# Utkalpradesh praacheenadya: Shresthatvam

"उत्कलप्रदेशे प्राचीनद्या: श्रेष्ठत्वं"

Dr.Manasi Ratha

DESIGNATION : Lecture in Dharma Shastra,At : Bagdevi Sanskrit College,Daliji,Kendrapara,Odisha

ABSTRACT : सप्तदशशतके विरचितस्य तालपत्रमातृकारूपेण च जीर्णशीर्णरूपेण विधमानस्य ग्रन्थरत्नस्यास्य प्रकाशनेन नन्दमहोदय: सुधीसमाजस्य न केवलं श्रद्धाभाजनं भवति, अपितु उत्कलीयधर्मशास्त्रभाण्डागारमपि पुष्कली करोति ।। क्षेत्रस्यास्य विषये अथर्ववेदे शतपथब्राह्मणे तैतरीयब्राह्मणे मैत्रायणीसंहितायामुल्लेखो विद्यते ।

प्राचीनकालादारभ्य उत्कलस्य यानि तीर्थक्षेत्राणि अद्यावधि विद्यमानानि सन्ति तानि समालोच्यन्ते । सर्वभारतीयतीर्थमध्ये यद्यापि उत्कलस्य तीर्थानि समागच्छन्ति तथापि न मया तेषामालोचनं विहितम् । अस्या: उपत्यकाया: गवेषोणाया: प्राचीनोत्कलस्य सभ्यताविषये सम्यक् ज्ञानं कलाभास्कर्यादिविषये क्षेत्रमिदं मूकसाक्षित्वेन विराजमानमस्ति ।

REFERENCE : Dr.Atul Kumar Nanda ( Book-"SMRITI SARA SAMGRAHA"),Dr.Dayanidhi Mishra ( Book-"UTKALIYA SUDHI SAMIKSHA"),Dr.Braja Kishore Swain ( Book-TIRTHAKSHETRANI"),Dr.Biswanath Swain ( Book-"KALASARVASWA")

उत्कलेषु विद्यमानासु पुण्यतोयासु नदीषु प्राची भवति अन्यतमा । अस्या: आकृति: यद्यापि क्षुद्रा तथापि अस्या: उपत्यकायामनेकानि प्राचीनमन्दिराणि प्राचीनदुर्गाणि च एतानि यथा विद्यन्ते तथैव नान्यत्र देशेषु अधुना विद्यमानानां भग्नमन्दिराणामनुशीलनेन पर्यालोचनेन चैतत्

प्राप्यते । अस्यामुपत्यकायां शैव-शाक्त-वैष्णवधर्माणां लीलाभूमिरासीत् । अस्या: उपत्यकाया: गवेषोणाया: प्राचीनोत्कलस्य सभ्यताविषये सम्यक् ज्ञानं कलाभास्कर्यादिविषये क्षेत्रमिदं मूकसाक्षित्वेन विराजमानमस्ति । अतिप्राचीनकालादेव यद्यपि शैवधर्मस्य विस्तार: उत्कलभूमावेवासीत् । तथापि तेनैव शैवधर्मेण साकं शाक्तधर्मस्य सुमहान् सम्बन्ध: विद्यते स्म । शाक्तधर्मस्य परम्परा भारतवर्षे कदा प्रचलिता प्रचलिता जातेति बहुनि मतपार्थक्यानि यद्यापि दृश्यन्ते तथापि तेषु मतेषु सार्.जन्.मार्शल्मतं प्रणिधानयोग्यम् । तन्मतं यथा तेनोक्तम्-औशाम्भिनगर्या योनिदृशं प्रस्तरं प्राप्तं

तेन । यस्मिन् प्रस्तरे शाक्ततन्त्रस्य यन्त्रमाला खोदितास्ति । अस्माद् विज्ञायते शाक्तधर्मस्योद्भवो विकाश: पञ्चसहस्रवर्षेभ्य: प्राक् अभूदिति । अस्माकमुत्कलेपि तन्त्रस्य शक्तिपूजाश्च सुमहान् प्रभाव: बहुप्राचीनकालात् पतितोस्ति ।

पञ्चमशताब्दीत: चतुर्दशशताब्दीं यावत् प्राच्युपत्यका शक्तिपूजाया: प्रधानपीठमासीत् । अत्र शक्तितत्त्वरूपिणी देवी दुर्गा , द्वीभुजा , चतुर्भुजा , षड्भुजा , अष्टभुजा , दशभुजा , द्वादशभुजारूपेण प्रपूजिता भवति । उत्कले दुर्गापूजाया: परम्परा तान्त्रिकी भवति । अस्या: दुर्गाया: नामान्तरं विभिन्नमूर्त्तय: प्राचीनद्या: कूले प्राप्यन्ते । तासु मूर्त्तिषु काकटपुरस्थिता मङ्गलान्यतमा । इयं प्राचीनदी बहुनां देवदेवीनां समवाये पुण्यतोया

भवति । अद्यापि इयं रहस्यमयी विद्यते । उत्कलेषु विद्यमानासु महानदीषु कथं वा अस्या: कूले बहुसंख्यानि मन्दिराणि निर्मितानि तस्मिन् विषये गवेषका: संदिग्धा: भवन्ति । भौगोलिकस्थितिदृष्ट्या विचारे कृते उत्कलस्य राजामहाराजा: अस्या: नद्या: अववाहिकां पवित्रतमा इति मत्वा विभित्रसंप्रदायस्य पीठरूपेण गृहीतवन्त: । इयं नदी अत्यन्तं वक्रिला विभित्रा शाखानदी–उपनदीभि: परिवेष्टिता । अस्या: पवित्रताया: प्राच्या: गवेषणायां केचन ग्रन्था: प्रकाशिता । तेषु ग्रन्थेषु डॉ. राधाचरणपण्डामहोदयानां प्राचीनद्या: ऐतिहासिकविभव: अन्यतम: ।

अत: पवित्रप्राची उपत्यका उत्कलस्येतिहासं परिपुष्टं करोति । अस्या: माहात्म्यं वैशिष्ट्यश्च इदं तावदासीत् भारतीयसर्वधर्मस्य समन्वय प्राचीक्षेत्रे एव आसीदिति ।